# Karanja

करञ्जो मञ्जरीपुष्पो लाजपुष्पः प्रकीर्यकः ।
छायाप्रियो नक्तमालः प्रकीर्या चोदकीर्यकः ॥
उदकीर्या कीर्यकश्च कच्छूदारश्च गुच्छकः ।
गुच्छो गजकरञ्जेति शब्दाः पर्यायवाचकाः ॥ **(Aa ma)**

Karanja is also called as manjaripuspa, lajapuspa, prakiryaka, chayapriya, naktamala, prakirya, udakiryaka, udakirya, kiryaka, kacchudara, gucchaka, guccha and gajakaranja.

करञ्जो नक्तमालश्च करञ्जश्चिरबिल्वकः । **(Bpn)**

Karanja is also called as naktamala, karaja and cirabilvaka.

करञ्जो नक्तमालः स्यान्नक्ताह्वो गुच्छपुष्पकः ।
घृतपूरः स्निग्धपत्रः प्रकीर्या पुष्पमञ्जरी ॥
उदकीर्या पूतिकर्णः प्रकीर्णो मातृनन्दनः ।
पूतिकरञ्जः पूतीकः कैड़र्यश्चिरबिल्वकः ॥ **(Kdn)**

Synonyms of karanja are naktamla, naktahva, gucchapuspaka, ghrtapura, snigdhapatra, prakirya, puspamanjari, udakirya, putikarna, prakirna, matrnandana, putikaranja, putika, kaidarya and cirabilvaka.

करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत् ।
कुष्ठोदावर्त्तगुल्मर्शोव्रणकृमिकफापहा ॥

तत्पत्रं कफवातार्शःकृमिशोफहरं परम् ।
भेदनं कटुकं पाके वीर्योष्णं पित्तलं लघु ॥

तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् l **(Bpn)**

Karanja is katu in rasa, tiksna in guna, usna in veerya, alleviates kapha, cures yonidosha, kustha, udavarta, gulma, arsa, vrana and krmi.

Its patra is laghu in guna, usna in veerya, katu in paka, alleviates kapha and vata, increases pitta, is bhedana, cures arsa, krmi and sopha.

Its phala alleviates kapha and vata, cures meha, arsa, krmi and kustha.

करञ्जः कटुरुष्णश्च चक्षुष्यो वातनाशनः l

तस्य स्नेहोतिऽस्निग्धश्च वातध्नः स्थिरदीप्तिदः ll **(Rjn)**

Karanja is katu in rasa, usna in veerya, caksushya and destroys vata.

Its sneha is ati snigdha, sthira, diptida and alleviates vata

करञ्जश्चोष्णा तिक्तः स्यात् कफपित्तास्र दोषजित् l
व्रणप्लीहकृमीन् हन्ति भूतघ्नो योनिरोगहा ll **(Dhn)**

Karanja is tikta in rasa, usna in veerya, alleviates kapha, pitta and asra dosha, cures vrana, pliha, krmi, bhuta and yoniroga.

करञ्ज: कटुकः पाके रसे तिक्तकषायकः l
कटुको गुणतस्तीक्ष्णो वीर्योष्णो विनियच्छति ll
वलासपित्तकुष्ठास्रव्रणमेदोदरकृमीन् l

तत्पत्रं कटुकं पाके वार्योष्णं पित्तलं लघु ll
भेदनं कफवातार्शोजन्तुशोफव्रणान् जयेत् l

अङ्कुरः कटुकः पाके रसे दीपनपाचनम् ll

कफवातापहः शोफविषर्शःकृमिकुष्ठजित् । (Kdn)

Karanja is tikta, kasaya, katu in rasa, tiksna in guna, usna in veerya, katu in paka. It cures balasa, pitta, kustha, asra, vrana, meda, udara, and krmi.

Its patra is laghu in guna, usna in veerya, katu in paka, increases pitta, alleviates kapha and vata, is bhedana, cures arsa, jantu, sopha and vrana.

Ankura is katu in paka and rasa, alleviates kapha and vata, is dipana, pacana, cures sopha, visa, arsa, kustha and krmi.

करञ्जः कटुकः पाके नेत्र्योष्णस्तिक्तको रसे ।
कषायोदावर्त्तवातानां योनिदोषापहः स्मृतः ॥
वातागुल्मार्शव्रणहृत् कण्डूकफविषापहः ।
विचर्चिकापित्तकृमित्वग्दोषोदरमेहहा ॥

पलीहाहरश्च संप्रोक्तः फलमुष्णं लघु स्मृतम् ।
शिरोरुग्वातकफहृत् कृमिकुष्ठार्शमेहमुत् ॥

पर्णपाके कटुष्णं स्यात् भेदकं पित्तलं लघु ।
कफवातार्शकृमिनुत् व्रणं शोफं च नाशयेत् ॥

पुष्पमुक्तं चोष्णवीर्यं पित्तवातकफापहम् ।

अस्याङ्कुरा रसे पाके कटुकाश्चाग्निदीपकाः ॥
पाचकाः कफवातार्शःकुष्ठकृमिविषापहाः ।
शोफनाशकराः प्रोक्ता ऋषिभिः सूक्ष्मदर्शिभिः ॥ (Nir)

Karanja is tikta, kashaya in rasa, usna in veerya, katu in  paka, netrya, cures udavarta, vata, yonidosha, vataja gulma, arsa, vrana, kandu, kapha, visha, vicarcika, pitta, krmi, tvag dosha, udara, meha and pliha roga.

Phala is laghu in guna, usna in veerya, alleviates vata and kapha, cures siro ruk, krmi, kustha, arsa and meha.

Parna is laghu in guna, usna in veerya, katu in paka, increases pitta, alleviates kapha and vata, is bhedaka, cures arsa, krmi, vrana and sopha.

Puspa is usna in veerya, alleviates pitta, vata and kapha.

Its ankura is katu in rasa and paka, agni dipaka, pacaka, destroys kapha and vata, cures arsa, kustha, krmi, visha and sopha.

**करञ्जो ज्वरत्वग्दोषनाशनो दन्तदार्ढ्यकृत् ।**
**कटुको भेदनस्तस्य फलं नयनपुष्पहृत् ॥**
**पित्तश्लेष्मण्युदासीनं विष्टम्भनविबन्धकृत् । (Sdn)**

Karanja is katu in rasa, danta dardhya kara, and cures jvara, tvag dosha. Its phala is bhedana, nayana puspa hara, pitta -slesma udasin,cures vistambha and vibandha.

**करञ्जतैलं तीक्ष्णोष्णं कृमिहृत् रक्तपित्तकृत् ।**
**नयनामयवातार्त्तिकुष्ठकण्डूव्रणप्रणुत् ॥**
**वातनुत्पित्तकृत्किञ्चिल्लेपनाच्चर्मदोषनुत् । (A.S)**

Karanaja taila is tiksna in guna, usna in veerya, increases vata and pitta, rakta pitta kara, cures krmi, nayana amaya, vata arti, kustha, kandu, Vrana and on lepana it is carma dosha nasa.

**करञ्जतैलं नयनार्त्तिनाशनं**
**वातामयध्वंसनमुष्णतीक्ष्णकम् ।**
**कुष्ठार्त्तिकण्डूतिविचर्चिकापहं**
**लेपेन नानाविधचर्मदोषनुत् ॥ (Rjn)**

Karanja taila is tiksna in guna, usna in veerya, alleviates vata and ama dosha, cures nayana arti, kustha, arti, kandu and vicarcika. On lepana it is nanavidha dosha hara.